अनुक्रमांकः ..................................
निरीक्षकस्य हस्ताक्षरम् .......................

| Paper Code |
|---|
| BV-104 |

# पतञ्जलिविश्वविद्यालयः

## परीक्षा – दिसम्बरमासः – 2018
## शास्त्री/बी. ए. व्याकरणम् (सत्रम् : प्रथमम्)
## संस्कृतम्
## चतुर्थपत्रम्–वैदिकसिद्धान्तपरिचयः

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

---

**अवधेयम् :** इदं प्रश्नपत्रम् सप्ततेः (70) अङ्कानां विद्यते। अत्र खण्डद्वयं वर्त्तते। प्रत्येक खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्त्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

### (खण्डः – अ) 15 अङ्काः
### (वेदः – इन्द्रसूक्तम्, ज्ञानसूक्तम्)

**प्रश्नः1–** उपर्युक्तसूक्तेषु स्मृताः केचन पञ्चमन्त्राः लेखीयाः। **(01X05=05)**

**प्रश्नः2–** चतुर्णां मन्त्राणां शब्दार्थपुरसरं स्वशब्दैरर्थबोधनम्। **(2.5X04=10)**

(क) सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि।।

(ख) उत त्वः पश्यन्नददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः।।

(ग) यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत्।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्यमह्ना स जनास इन्द्रः।।

(घ) सर्वे नन्दन्ति यशसागतेन सभासाहेन सख्या सखायः।
किल्बिषस्पृत्पितुषणिर्ह्येषामरं हितो भवति वाजिनाय।।

(ङ) यः शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्यन्वविन्दत्।
ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः।।

### (खण्डः – ब) 20 अङ्काः
### (दर्शनम्)

**प्रश्नः1– पृष्टात् सूत्रादग्रे पञ्च सूत्राणि लेखनीयानि।** **(2.5X02=05)**

(क) यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि।

(ख) तत्र निरतिशयं सर्वबीजम्।

**प्रश्नः2– पृष्टानां पञ्चानां सूत्राणामर्थं बोधयन्तु।** **(02X05=10)**

(क) तस्य सप्तधा प्रान्तभूमिप्रज्ञा
(ख) वीतरागविषयं वा चित्तम्।
(ग) हेयं दुःखमनागतम्
(घ) ऋतम्भरा तत्र प्रज्ञा।
(ङ) ततः क्षीयते प्रकाशावरणम्

**प्रश्नः3– द्वयार् विषयात्मकयोः प्रश्नयोः समाधानम्।** **(2.5X02=05)**

(क) यमाः कति सन्ति वर्ण्यताम्

(ख) "वितर्कबाधनेप्रतिपक्षभावनं" किम्?

(ग) अविद्यायाः स्वरूपं किं स्पष्टं कुर्वन्तु ।

## (खण्डः – स) 15 अङ्काः

## (उपनिषद्)

**प्रश्नः1– पृष्टानां पञ्चानां मन्त्राणां पूर्त्तिः करणीयाः ।** **(01X05=05)**

(क) अनेजदेकं० ....................।

(ख) स पर्य्यगात्० ........................।

(ग) पूषन्नेकर्षे० .....................।

(घ) .......................... विचचक्षिरे।।

(ङ) .......................... लिप्यते नरे।।

(च) सम्भूतिम्०.............................।

(छ) .............................. नम उक्तिं विधेम।।

**प्रश्नः2– द्वयोर् भावं बोधयन्तु।** **(05X02=10)**

(क) के जनाः आत्महन्तारः भवन्ति।

(ख) विदुषां निकटेऽविदुषां च ब्रह्म दूरेऽस्तीति कथम् ?

(ग) परमात्मानं विज्ञाय मनुष्याः किं कुर्युः ? ज्ञापयन्तु।

(घ) "तत्र को मोहः कः शोक" इति किम् ?

## (खण्डः – द) 20 अङ्काः

## (गीताः)

**प्रश्नः1– पृष्टानां पञ्चानां श्लोकानां पूर्त्तिः कार्या ।** **(02X05=10)**

(क) न कर्मणाम्० ..............................।।

(ख) यज्ञार्थात्० ..............................।।

(ग) कर्मणैव० ......................................।।

(घ) इन्द्रियस्य० ..................................।।

(ङ) इन्द्रियाणि० ..................................।।

(छ) धूमेनाव्रियते०..............................।।

**प्रश्नः2– पञ्चानां श्लोकानां पदच्छेदविभक्तिसमासा कार्याः ।** **(02X05=10)**

(क) मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः।।

(ख) काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्धयेनमिह वैरिणम्।।

(ग) कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते।।

(घ) न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्।।

(ङ) आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च।।

(च) एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना।
जहि शत्रुं महाबाहो कामरूपं दुरासदम्।।

---------------x---------------